|| শ্রী ||
অথ শ্রী ত্রিবিক্রমপংডিতাচার্য়সুত শ্রী নারায়ণপংডিতাচার্য়বিরচিতঃ
|| শ্রী মধ্ববিজয়ঃ ||

## ১৪. চতুর্দশঃ সর্গঃ

পরিবৃঢঘনসংঘে রাজসিংহোর্জশক্ত্যা
ত্যজতি মলিনভাবং নীরসত্বান্নিকামম |
স্ফুটমুদয়তি তেজস্যুজ্জ্বলে মধ্বভানৌ
সুজনজলজকাংত্যৈ বিশ্বমাসীন্মনোজ্ঞম || ১৪.১ ||

কৃতমপকৃতমার্য়ৈঃ ক্ষম্যতাং ক্ষাংতিভূষৈঃ
ইতি মৃদু বদতাং চ প্রার্থনাভিঃ প্রভূণাম |
অপহৃতমপরেষাং মংত্রতো গ্রংথজাতং
দশহৃদয়নিয়োগাদগ্রহীচ্ছংকরার্য়ঃ || ১৪.২ ||

পরিবৃতমবনম্রৈর্গ্রামণীগ্রাম্যপূর্বৈঃ
অবনতমুরুচেতঃপাদপার্শ্বে নৃসিংহম |
সহজবিজয়তোঽয়ুগ্বিক্রমার্য়ঃ প্রসন্নঃ
কবিকুলতিলকোঽসাবাশিষাঽতোষয়ত্তম || ১৪.৩ ||

উপচরতি নিতাংতং হংত পৌরংদরী ধূঃ
দ্যুসদসি ভজতো য়ং দুর্লভা দভ্রভাগ্যৈঃ |
দিশতু স পরমাগ্র্যানংদতীর্থাংঘ্রিরেণুঃ

ধরণিধর সুখং তে সংততং স্বাংতরেতি || ১৪.৪ ||

অনতিপরিচিতস্যাপ্যস্য সোঽয়ং কবীংদ্রো
গুণরসমতিগূঢং জ্ঞাতবানিত্যচিত্রম |
মধু মধুকররাজো নিষ্পতন পৌষ্পমাপ্তুং
ননু পরিচয়হীনঃ কাননেঽপি প্রভুঃ স্যাত || ১৪.৫ ||

অখিলখলকুলানাং বর্ধয়ন দ্বেষদোষং
বিদধদপি নরাণাং কৌতুকং মধ্যমানাম |
স্বগতিসমুচিতানাং ভূতিদায়ী শুভানাং
বহলহৃদিহ নিন্যে শর্বরীঃ কাশ্চিদেবম || ১৪.৬ ||

উদয়তি বিনতায়া নংদনে শ্লাঘ্যকালে
স কৃতসকলকৃত্যঃ কৃত্যবেদিপ্রবেকঃ |
অরুণয়বনিকাংতর্ব্রহ্ম নারায়ণাখ্যং
গুরুগুণমভিদধ্যৌ য়োগ্যয়োগাসনস্থঃ || ১৪.৭ ||

অতিধবলিতদংতা দংতকাষ্ঠৈঃ প্রশস্তৈঃ
অপি য়ুগপদনেকে সম্নুরত্র ব্রতীংদ্রাঃ |
গুরুভিরভিহিতেষ্বাচারভেদেষু নিষ্ঠাং
স্ফুটমবগময়ংতঃ সৌষ্ঠবাত কর্মণাং চ || ১৪.৮ ||
চরমসময়সুপ্তাঃ পূর্বমুত্থায় শিষ্যাঃ
গুরুজনপরিচর্যাং চক্রিরে দুষ্করাং চ |
সবহুমতি তদাদ্যপ্যাঽর্ধরাত্রাত প্রসন্নাঃ

সুগতিরপরথৈষাং স্যাত কথংকারমিষ্টা || ১৪.৯ ||

শ্রবণমননহেতোঃ প্রাক চিরায়াস্তনিদ্রঃ
সপদি বিবশয়ংত্যা নিদ্রয়া গ্রস্তচেতাঃ |
স্বয়মপি নয়তি দ্রাগংগবস্ত্রাদি পূজ্যে
ঝটিতি বিগতনিদ্রঃ কোঽপি শিষ্যোঽন্বশেত || ১৪.১০ ||

বিহিতমবিহিতং প্রাগেব কস্মাদ বিনিদ্রৈঃ
ইতি গুরুপরিবাদাশংকয়া নম্রগাত্রাঃ |
চিরমনবতরংতঃ শ্রাবকা মুক্তমার্গাঃ
গুরুষু জলসকাশস্থেষু তূষ্ণীমতিষ্ঠন || ১৪.১১ ||

বিপুলহৃদয়পার্শ্বে দীপদীপ্তিপ্রদীপ্তে
দরবরপরিপূর্ণৈর্বার্ভিরর্ঘ্যাদি দত্বা |
য়তিরতিয়তচেতাশ্চক্রিণোঽর্চানিকায়াত
কুসুমসমিতিমগ্র্যামাদরাদুজ্জহার || ১৪.১২ ||

অমৃতমপি নিরীক্ষ্যাঽস্রাবি নির্মাল্যসূনে
ঘৃতমিদমিতি সদ্যো ভ্রাংতিমংতোঽপি শিষ্যাঃ |
শ্রদধুরধিকবাক্যৈর্বিভ্রমাস্তচ্চ পশ্চাদ
অনুদিনমমৃতান্নৈস্তস্য সেব্যস্য শক্ত্যা || ১৪.১৩ ||

অগমদুচিতমংত্রৈস্তূদয়ানাং ত্রয়াণাং
কৃতিভিরনুমতাত্মা তত্র পংচাংগবিদ্ভিঃ |

উদয়মহিমরোচিশ্চক্রবর্তী ত্রিশক্তিঃ
দধদতিবৃহদংতঃ ষড্গুণং স্বাত্মতেজঃ || ১৪.১৪ ||

তিমিরনিকরকুংভিব্রাতমত্যংততীব্রং
স্থিরতরমখিলানাং প্রাণিনাং রুদ্ধমার্গম |
ভুবনভবনপূর্ণং ভানুমানংজনাভং
হরিরিব নখরৈঃ প্রাগ রশ্মিজালৈর্নিরাস || ১৪.১৫ ||

মধুরপতগরাবাঃ শাংতনৈশাংবুবাষ্পাঃ
সপদি বিপুলরাগঃ স্বাভিসারাত প্রসন্নাঃ |
অরুণতরণিরত্যচ্ছাংবরা দিক্পুরংধ্রীঃ
স্মিতসরসিজবক্ত্রাঃ স্বৈঃ করৈরালিলিংগে || ১৪.১৬ ||

প্রণতিরভসধূলীবদ্ধশোভাবিশেষা
দধুরুপকৃতিমত্তাং সাধুজালাংতরাপ্তাঃ |
সময়মুপনতং সংবেদয়ংতো বয়স্যা
ইব দশশতকেতোঃ কেতবঃ শ্রাবকাণাম || ১৪.১৭ ||

নিহিতমুচিতমুচ্চং য়োগপীঠং প্রবক্তুঃ
পরিষদি পরিতোঽমী সত্বরাঃ সত্ত্বভাজঃ ||
দ্রুতমবসিতকৃত্যৈর্ধন্যসংন্যাসিবর্গৈঃ
শ্রবণপরমকৃত্যায়োপতস্থুঃ সমেতাঃ || ১৪.১৮ ||

বভুরমলগুণানাং শোভনাচ্ছাদনানাং

মুররিপুনিলয়ানাং হংত বৈদাংতিকীনাম |
সপদি সুবিবৃতানামংতরর্থা ধিয়াং বা
বিবিধকবলিকানাং সংচয়াঃ পত্রিকাণাম || ১৪.১৯ ||

অনতিবিরলভাবা অপ্যনন্যোন্যসংগাঃ
ঋজুতরততনানাপংক্তিসাম্যাপ্তশোভাঃ |
দ্বিরদতুরগদেশ্যা দূরতো বর্জিতাংতাঃ
কুশললিখিতরূপা রেজিরে তেষু বর্ণাঃ || ১৪.২০ ||

সপদি দদৃশুরেকে বাচনীয়াদিভাগং
পরিচয়পটুতাভ্যাং তাবদেকে চিরেণ |
হরিগুরুনমনং দ্রাগ য়ন্ত্রতোঽমী বিধায়
প্রয়য়ুরপরসাম্যং সিদ্ধয়ে স্যাদ্ধি য়ত্নঃ || ১৪.২১ ||

য়তবচসি জনেঽস্মিন্নানতে সন্নিরস্যন
সিচয়য়বনিকাং তাং সাংধ্যজীমূতরক্তাম |
রবিরিব রবিপূজ্যাংঘ্রিঃ সমাজাংতরিক্ষে
ব্যলসদতি শয়ালুঃ সন সহস্রপ্রকাশঃ || ১৪.২২ ||

ত্রিভুবনবরতেজোব্যক্তবেদার্থশুক্ল
ত্রিতয়রসতয়া য়ে বর্ণিতা বর্ণবর্য়াঃ |
পৃথুমতিরথ তেষামৈক্যমাপাদ্য সম্যক
প্রবচনপরিশুদ্ধ্যৈ স্ম প্রণৌতি প্রবীণঃ || ১৪.২৩ ||

স্বরমচরমকালে মংদ্রমেবাত্যজদ্ভিঃ
স্ফুটমুপনিষদংতে বাচকৈর্বাচ্যমানে |
প্রবচনমতিচিত্রং প্রাণভাজাং শ্রুতীনাং
অমৃতমমৃতভাবস্যৈষ হেতুং চকার || ১৪.২৪ ||

ধনমিব সধনায়েভ্যোঽর্কসূনুঃ প্রসন্নঃ
শরশতমিব পার্থঃ সংয়ুগার্থিভ্য উগ্রঃ |
অরতিবিরহিতঃ সোঽনারতং নাঽদিশন্নো
প্রতিবচনমদীনং চোদকেভ্যোঽখিলেভ্যঃ || ১৪.২৫ ||

অথ দশশতশোচিষ্যাপ্রয়াতি প্রতীচ্যাং
প্রবচনমবসায় স্নাতুমায়াত তটাকম |
পৃথুমতিরিহ তাবচ্ছ্রেষ্ঠসংসর্গলোলৈঃ
সমগমি সপদি স্বর্নিম্নগাদ্যৈশ্চ তীর্থৈঃ || ১৪.২৬ ||

ঘনরসনিকরোঽসাবংতরত্যংতশুদ্ধো
মুনিগণ ইব ভূয়ঃ স্নেহবান প্রাগ দধানঃ |
প্রতিকৃতিমখিলজ্ঞস্যাঽপরোক্ষ্যেণ তাবত
স্ফুটমলভত রূপং মজ্জনে সজ্জনেষ্টম || ১৪.২৭ ||

অপরিমিতমনীষস্যোল্লসচ্ছংখবাহোঃ
রথচরণিশিলানাং তন্বতোঽত্রাভিষেকম |
প্রতিতনব উদারাস্তাস্বলং সন্নিধাতুঃ
তনব ইব বিরেজুঃ পাংচজন্যপ্রিয়স্য || ১৪.২৮ ||

www.yogsigma.com

অভিদধতি মুনীংদ্রা দ্বাদশাব্দোপবাস
প্রতিমফলমলংয়ৎেসবনং ভক্তিয়ুক্তম |
অধিকমমরনদ্যাদ্যাপ্লবাদ্ধন্যমান্যাদ
অপিবদলববোধো বিষ্ণুপাদোদকং তত || ১৪.২৯ ||

তরণিভিরিব গৌরৈরূর্ধ্বপুংড্রৈর্দ্বিষড়্ভিঃ
সদরপরমচক্রোদীর্ণতেজা হরীষ্টঃ |
মুররিপুবিমুখানাং দুস্সহো দেহভাজাং
লয়সময় ইবান্যো মান্যধীরাবভাসে || ১৪.৩০ ||

সমধিকধিষণস্য প্রেক্ষমাণো জনৌঘঃ
প্রকৃতিমধুরমাস্যব্যাজপূর্ণেংদুবিংবম |
অমুচদপসরেতি শ্রাবকোক্তেঃ পুরাঽস্মিন
প্রচলতি পদবীং তাং প্রাংজলিস্তূর্ণমারাত || ১৪.৩১ ||

গুরুচরণসরোজদ্বংদ্বনির্ণেজনাংভো
দধতি জননিকায়ে সর্বমুর্বীগতং চ |
অবনিরনভিনংদিন্যপ্যদশ্চক্ষমেঽসৌ
কথমপি কথমেব স্যাত ক্ষমাখ্যাঽন্যথাঽস্যাঃ || ১৪.৩২ ||

অবিদিতরসভেদং শীতলং লঘ্বগংধং
বিমলমমলপাণিঃ পাণিজৈরপ্রবিষ্টম |
বদনপবনভীত্যা পার্শ্বতো বিভ্রদগ্র্যং

কমথ করকপূর্ণং সংয়মীহানিনায় ‖ ১৪.৩৩ ‖

বিহসিতবিসভংগশ্রীপ্রকর্ষং সিতিম্না
জলজমমৃতপূরৈঃ পূরয়ামাস রম্যম |
সময়গুণবিশেষালোচকৈর্লালনীয়ঃ
সসুরভিসুমনোভিঃ স স্ফুটং গৌরপক্‌শ অঃ ‖ ১৪.৩৪ ‖

বিমলমলয়জাংভোবিংদুভিশ্চর্চিতার্চো
নবললিততুলস্যা পুষ্পরাজ্যাঽর্চিচত সঃ
স্থলজজলজবল্লীবৃক্ষবীরুৎসমস্ত
প্রসববিজয়লক্ষ্ম্যা মূর্তয়েবেংদিরেশম ‖ ১৪.৩৫ ‖

স দদদধিকবোধঃ ষোডশাত্রোপচারান
ব্যরহয়দগুণান দ্বাত্রিংশদাগঃ পুরোগান |
অগণিতগুণমুচ্চৈস্তোষয়ন শার্ঙ্গপাণিং
ষডপি পরমভক্ত্যাঽনূপচারান দিদেশ ‖ ১৪.৩৬ ‖

তমরুণমণিবর্ণং দিব্যদেহাখ্যগেহে
স্নপিতমতিপৃথুশ্রদ্ধানদীচিত্তবার্ভিঃ |
ননু স য়জতি নিত্যং হৃৎসরোজাসনস্থং
ন তু সকৃদিতি পুষ্পৈরষ্টভির্ভাবপুষ্পৈঃ ‖ ১৪.৩৭ ‖

কৃতপরমসপর্যঃ সাংদ্রসচ্চংদনাংভঃ
পরিমলিতভুজোরোমংডলাংসো মনীষী |

স্মিতরুচিরমুখেংদুঃ স্নিগ্ধকৌশেয়বাসাঃ
স মুনিসুরনরাণাং চক্ষুষামুৎসবোঽভূত ॥ ১৪.৩৮ ॥

পরমথ পরমান্নং প্রাপ্তমেবাপ্রয়াসং
প্রভুরিহ বুভুজেঽসৌ বেদবাদপ্রবীণঃ ।
অজিতপরমভক্তঃ সংততং মন্যমানঃ
সকলজগদধীশঃ প্রীয়তাং শৌরিরিত্থম ॥ ১৪.৩৯ ॥

সহচরপরিক্লৃপ্তে সূক্ষ্মবস্ত্রাস্তৃতেঽসৌ
অবিতনুরুহরূপৌশীরবর্য়ে নিষণ্ণঃ ।
অরময়দিহ নানাহৃদ্যবিদ্যাবিলাসৈঃ
কবিজনপরিবারং মংডয়ন মংডপাগ্র্যম ॥ ১৪.৪০ ॥

অবসরমধিগম্য ভ্রূবিজৃংভাদভীষ্টো
মুখসততগলক্ষ্মীভূতপাণিপ্রবালঃ ।
স্মিতনয়নবিকাসৈস্তস্য বিজ্ঞাতভাবঃ
শ্রবসি কিমপি কার্য়ং মংত্রয়ামাস মংক্ষু ॥ ১৪.৪১ ॥

প্রণতিপরমকৃত্যাঃ সম্মতের্য়ে জনৌঘাঃ
বিবভুরনতিদূরে সংহতাস্তানতীত্য ।
অহমহমিকয়াঽঽশু প্রাপ্য পার্শ্বং প্রণেমুঃ
বহব ইহ গৃহস্থাঃ পূর্বসেবাং বিধাতুম ॥ ১৪.৪২ ॥

বিবিধজনপদস্থাঃ প্রাক শ্রুতেভ্যো গুণেভ্যঃ

www.yousigma.com

শতগুণগুণমেনং বিস্মিতা বীক্ষমাণাঃ |
মুকুলিতকরপদ্মা আস্যতামিত্যবাপ্তাঃ
প্রচুরতরহৃদা সংভাবয়াংচক্রিরেঽন্যে || ১৪.৪৩ ||

অলমলমনুবাদেনানুবাচ্যেত পশ্চাত
ননু গুরব ইদানীমুদ্যতা হি প্রবক্তুম |
ন মননমধুনা দ্রাগাব্রজেত্যাহ্বয়ত তান
শ্রুতপরিচয়সক্তান শ্রাবকান শ্রাবকাগ্র্যঃ || ১৪.৪৪ ||

অধিকধিষণমেনং ব্যাখ্যয়া শোভমানং
হরিমিব কবিবর্য়ং সত্যবত্যাস্তনূজম |
সততমনিমিষং সংদৃশ্য সানংদচিত্তাঃ
সময়মপি গতং সংবিদ্রতে ন স্ম লোকাঃ || ১৪.৪৫ ||

উদয়মিত ইবাস্তং য়ংশ্চ ভানুর্বভাসে
স্ফুটমকলুশরূপো দর্শনীয়োঽনুরাগী |
শুচি হরিপদমাপৎসংপদোরাশ্রিতানাং
ন হি ভবতি বিশেষঃ স্বপ্রকাশোন্নতানাম || ১৪.৪৬ ||

মরতকমণিবর্ণে ভূতধাত্রী পুরংধ্র্যাঃ
লসতি জলধিবাসস্যর্ধলীনঃ ক্ষণার্ধম |
অরুণতরণিবিংবচ্ছদ্মনা পদ্মরাগঃ
কপিশকরকলাপোল্লাস্যভূত প্রেক্ষণীয়ঃ || ১৪.৪৭ ||

অবনিবনবনধ্রুগ্বায়ুখাহম্মহৎসু
প্রকৃতিগুণসমেতাব্যাকৃতাকাশ একম |
ততমতনুমনাঃ সোঽচিংতয়ত সৎসমাধৌ
অসুরসুরনরেভ্যঃ সদ্গুণং নাথমন্যম || ১৪.৪৮ ||

ব্যদধত পরিদৃষ্টজ্যোতিষঃ সাধু সাংধ্যং
নিয়মমবনিদেবা জ্যোতিষোঽপ্যাবলোকাত |
বিহিতমনুসরংতো ধর্মশাস্ত্রপ্রবীণাঃ
সবিতরি সবিতারং চিংতয়ংতস্ত্রিলোক্যাঃ || ১৪.৪৯ ||

বিবিদুরতিতরাং য়ে দেবতাঃ ষোডশোক্তা
হরহরিহয়পূর্বাংত্যাঃ কলাভেদতোঽস্য |
সুহুতমতিসৃজংতোঽগ্ন্যাহিতাস্তেঽগ্নিহোত্রং
ব্যধুরুচিতমপূর্বং য়েন গায়ত্রলোকঃ || ১৪.৫০ ||

বিধুরয়মকলংকঃ স্যাদ য়দি স্যাদবশ্যং
ননু নিজসহজায়াঃ সুংদরাস্যেংদুকল্পঃ |
ইতি সুরললনাভির্লালিতঃ খেচরীভিঃ
সমধিকমধুরিম্ণা পূর্ণ্চংদ্রস্তদোদৈত || ১৪.৫১ ||

ইনবিরহমসহ্যং প্রাপ্য পদ্মৈঃ সচক্রৈঃ
চিরমিহ পরিতপ্তং পূর্বতপ্তৈঃ সুতুষ্টম |
মৃদুকুমুদচকোরৈঃ পাদসংগেন রাজ্ঞঃ
কমপি সকলহৃদ্যং কল্পয়েন্নৈব দৈবম || ১৪.৫২ ||

www.yogma.com

দলিতেংদ্রনীলমণিনীলবিভ্রমং
নবকুংদকুড্মলসিতদ্বিজাবলি |
স্মিতয়া নগোত্তমশিরস্সুজাতয়া
বনমালয়া সুরভিতাশয়াঽন্বিতম || ১৪.৫৩ ||

মৃদুগামিবিমানসংপদো
রময়ত সুস্মিতগোপসুংদরীঃ |
পরিতাপবিহীনমুজ্জ্বলং
সুততং সূক্ষ্মতরাংবরং বরম || ১৪.৫৪ ||

গোভিস্তমাংস্যপনয়ন গতিদং প্রজানাং
অর্থাংতরং স ভগবান প্রকটীচকার |
আনংদচিদ্গুণগণং পরিপূর্ণসংবিত
চংদ্রস্তু শব্দগুণমিত্যয়মেব ভেদঃ || ১৪.৫৫ ||

|| ইতি শ্রীমৎকবিকুলতিলক ত্রিবিক্রমপংডিতাচার্য়সুত
শ্রীনারায়ণপংডিতাচার্য়বিরচিতে শ্রীমধ্ববিজয়ে
আনংদাংকিতে চতুর্দশঃ সর্গঃ ||

www.yousigma.com